Postal Regd.No. GAMC- 1553/2022-2024

ISSN 2454-6313

संस्कृत-

# साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १७ अङ्क : १९५
अगस्त - २०२२

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2022-2024 issued by SSP Ahmedabad. Valid upto 31-12-2024. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### बालो रक्षति रक्षितः

वृष्टिकालः वर्तते। अहं प्राङ्गणे विद्यमानायां दोलायाम् उपविष्टोऽस्मि। तदानीम् अकस्मात् कुतश्चित् कश्चित् जलबिन्दुः मम हस्ते पतति। अहं रोमाञ्चितः भवामि। एतया घटनया यः रोमाञ्चं न प्राप्नोति सः श्रेष्ठः उद्योगपतिः भवितुम् अर्हति, सहृदयः कविः भवितुं नार्हति। एतम् आकाशीयं बिन्दुं वयं भगवद्गीतायाः भाषया 'अनिकेतम्' वक्तुं शक्नुमः। सः अस्माभिः मेलितुमेव मेघात् पृथ्वीं यावत् दीर्घां यात्रां करोति। वस्तुतः इयं घटना सामान्या नास्ति। अतः उपेक्षणीया नास्ति।

विवाहसंस्कारेण संयुक्तौ नवदम्पती गृहस्थजीवनं प्रति पदं कुरुतः। केभ्यश्चित् मासेभ्यः अनन्तरं जलबिन्दुकल्पः कश्चित् मनोज्ञः शिशुः अवतरति। अयम् अपि चमत्कारः एव। कस्यचित् अदृश्यस्य तत्त्वस्य बलेन इयं घटना घटते। परमचेतनायाः सः अंशः, प्रभुणा प्रेषितः दिव्यः उपहारः अस्ति। उद्याने प्ररूढं पुष्पं, कुटुम्बे अवतीर्णम् अपत्यं च आदरणीयम् अस्ति। प्रेक्षणीयम् अपि अस्ति। द्वयोः अपि सुगन्धः चित्तं हरति। अयं सुगन्धः सामान्यः नास्ति। यदा शिशुः युवावस्थां प्राप्नोति तदा सः सुगन्धः शनैः शनैः विलीयते। तस्य कारणं समाजस्य 'भद्रता' अस्ति।

सर्वोऽपि बालकः गौरवम् अर्हति। यः बालकस्य गौरवं रक्षितुं न शक्नोति सः समाजः वस्तुतः अभद्रः अस्ति। यत्र सर्वदा कोलाहलः भवति तत्र बालकः विकसितुं न शक्नोति। कृषीवलाः बीजारोपणकाले, द्वयोः सीतयोः मध्ये उचितम् अन्तरं कल्पयन्ति। तत्रापि सम्मर्दः न भवेत् इति विचार्यते। तत् मानवजीवने अपि आवश्यकम्। सम्मर्दे मनुष्यस्य जीवनं म्लायति। धार्मिकाः उत्सवाः पवित्राः सन्ति, किन्तु तत्र जायमानः सम्मर्दः कदापि पवित्रः न भवति। यत्र अवकाशः अस्ति, तत्र प्रफुल्लनम् अस्ति। एतत् प्राप्तुं शिशोः अधिकारः अस्ति।

केचन चमत्काराः विस्मयम् उत्पादयन्ति। क्वचित् परममूर्खाणां गृहे उत्तमः सन्तानः अवतरति। तदा चित्ते भ्रमः जायते। कथम् एवं भवति ? हिरण्यकशिपोः गृहे प्रह्लादः सम्भवति इत्येव समाधानं तस्य ! क्वचित् विपरीतं भवति। सज्जनानां गृहे विवेकहीनाः बालकाः जायन्ते। कारणं यत्किमपि स्यात्, परं प्रभुणा प्रेषितः प्रत्येकं बिन्दुः स्वतन्त्रः अस्ति। अतः विलक्षणः अस्ति।

क्रीडायोग्ये वयसि श्रमः आरोप्यते तदा तस्य बालकस्य गौरवं हन्यते। दयालुः मनुष्यः मांसाहारं न करोति, परन्तु बालाहारं करोति। बालकस्य हस्तः लेखनीं ग्रहीतुं वर्तते, मार्गे पतितानि कागदानि चेतुं न। राष्ट्रस्य रक्षणाय बालकस्य रक्षणम् अपेक्षितम्। बालो रक्षति रक्षितः।

# समुद्रजलं किमर्थं लवणमयम् ?

बहोः कालात् पूर्वम् अरण्यसमीपे स्थिते ग्रामे उभौ सुहृदौ निवसतः स्म । सूजः यमारः चेति तयोः नाम । सूजः दृढकायः सुन्दरः च । यमारः न दुर्बलः, किन्तु नितराम् अलसः । यदि उन्नते वृक्षे फलानि दृश्यन्ते तर्हि वृक्षारोहणादिश्रमः सूजस्य । किन्तु उत्तमस्य फलस्य स्वीकारः तु यमारस्य ।

प्राप्तवयस्कतां गतवन्तौ तौ उभौ अपि विवाहितौ जातौ । सूजः लघुनि कुटीरे निवसन् श्रमेण उदरं पूरयति स्म । यमारः तु उत्तमे गृहे वसति स्म । महती सम्पत्तिः आसीत् तस्य ।

सूजयमारयोः मैत्री तु अनुवर्तते स्म । यदा विरामः भवति तदा तौ अरण्यं प्रविशतः स्म । कदाचित् तौ एकां गुहां प्रविष्टवन्तौ । तत्र शोभमानान् कांश्चन शिलाखण्डान् अपश्यत् सूजः । सः तान् सङ्गृह्य गुहातः बहिः आगत्य यमाराय दर्शितवान् । यमारः तेषां दर्शनतः नितरां सन्तुष्टः । तथापि सः शान्ततया उक्तवान् – ''अहं श्वः नगरं गत्वा एतेषां किमपि मूल्यं स्याद्वा इति विचारयिष्यामि'' इति ।

यमारः तान् शोभमानान् शिलाखण्डान् स्वीकृत्य अनन्तरदिने नगरं गतवान् । तानि वस्तुतः रत्नानि आसन् । अतः तेषां विक्रयणतः प्रभूतं धनं प्राप्तं तेन । ग्रामं प्रत्यागत्य सूजाय कानिचन नाणकानि दत्त्वा सः अवदत् – ''मित्र ! ते च शिलाखण्डाः वस्तुतः किमपि मूल्यं न अर्हन्ति स्म । कश्चन धनिकः पुष्पकरण्डकस्य अलङ्करणाय तान् क्रीतवान् । ततः प्राप्तस्य अर्धभागः भवते दत्तः अस्ति मया'' इति ।

रत्नानां विक्रयणतः प्राप्तेन धनेन नूतनं सुन्दरं भवनं निर्माय कांश्चन अश्वान् अपि क्रीतवान् यमारः । बहवः सेवकाः अपि कार्ये नियोजिताः तेन । ''पूर्वजैः निर्मिते गृहे निधिः प्राप्तः मया । ततः एतत्सर्वं कृतम्'' इति जनान् अवदत् सः ।

मित्रस्य प्रगतिं दृष्ट्वा सूजः नितरां सन्तुष्टः । किन्तु तस्य पत्नी निधिप्राप्तिविषये विश्वासं न कृतवती । सूजेन प्राप्ताः 'शिलाखण्डाः' एव यमारस्य सम्पत्तेः कारणं स्यात् इति तस्याः चिन्तनम् आसीत् । कदाचित् सूजस्य पुत्रः अस्वस्थः जातः । तस्य चिकित्सार्थं सूजसमीपे धनं न आसीत् । अतः गुहायां पुनरपि शिलाखण्डाः प्राप्येरन् इति धिया सूजः गुहां प्रति गतवान् ।

तावता गुहां प्रविशन् यमारः तेन दृष्टः । ''किमत्र क्रियते ?'' इति अपृच्छत् सूजः । ''एतेन मार्गेण गच्छन् आसम् । तदवसरे गुहा स्मृता । एवमेव अन्तः गन्तुम् उद्युक्तः'' इति उक्त्वा ''तदस्तु, भवता किमर्थम् अत्र आगतम् ? इति अपृच्छत् यमारः ।'' ''पुनरपि शिलाखण्डाः प्राप्येरन् इति धिया अहम् आगतः'' इति सत्यम् एव अवदत् सूजः ।

''आवाम् उभौ अपि सम्भूय शिलाखण्डम् अन्विष्याव । यदि ते प्राप्ताः स्युः तर्हि तान् नगरं नीत्वा अहमेव विक्रेष्ये । विक्रयणादिषु भवान् अपटुः । अतः योग्येन मूल्येन भवान् विक्रेतुं न शक्नुयात् कदाचित् ।'' इति उक्तवान् यमारः । ततः उभौ अपि अन्वेषणं कृतवन्तौ । किन्तु कुत्रापि किमपि न प्राप्तम् । ततः तौ गुहातः बहिः आगत्य गृहमार्गम् अनुसृतवन्तौ । ''वृष्टिलक्षणं दृश्यते'' इति वदन् यमारः वेगेन पदानि स्थापितवान् ।

मध्येमार्गं काचित् वृद्धा यमारम् अवदत् – ''वत्स ! काष्ठानाम् एतं बन्धं किं भवान् मम शिरसि आरोपयितुं शक्नुयात् ?'' इति । यमारः ताम् उपेक्षया दृष्ट्वा अग्रे गतवान् । ''अम्ब ! एतं बन्धम् अहं भवत्याः गृहं प्रापयिष्यामि'' इति वदन् सूजः तं काष्ठबन्धं स्वस्य शिरसि आरोप्य वृद्धाम् अनुसरन् तं बन्धं तस्याः गृहं प्रापितवान् ।

"वत्स ! भवान् नितरां दयालुः" इति वदन्ती वृद्धा एकं रोटिकाखण्डं तस्मै दत्त्वा पुनः अवदत् – "वत्स ! एतत् खादतु । तेन भवतः उदरं पूर्णं भविष्यति, भवतः शरीरे स्थिताः रोगाः अपगमिष्यन्ति च" इति । तं रोटिकाखण्डं प्राप्य सूजः नितरां सन्तुष्टः । 'एतम् अस्वस्थाय मम पुत्राय दास्यामि' इति चिन्तयित्वा ततः निर्गतवान् सः ।

किञ्चिद्दूरं यदा गतं तदा मार्गपार्श्वे शिलाफलकस्य उपरि शयानः आसन्नमरणः कश्चित् तम् अवदत् – "भोः मित्र ! अहं नितरां बुभुक्षितः अस्मि । किं भवान् मह्यं किमपि अन्नं दातुम् अर्हेत् ?" इति । दयार्द्रहृदयः सूजः स्वसमीपे स्थितं रोटिकाखण्डं तस्मै दत्तवान् एव । तस्य खादनात् आसन्नमरणः उत्थाय उपविष्टवान् ।

"मित्र ! नितराम् उपकृतः अस्मि अहम् । एकम् उपायनं दीयते मया । दर्शनेन सामान्यम् अपि एतत् अस्ति अतिमहत्त्वपूर्णम्" इति उक्त्वा वेणुनिर्मितम् एकं चक्रं सूजाय दत्तवान् सः । चक्रस्य एकः हस्तदण्डः अपि आसीत् । 'अपेक्षितं मनसि वदन् भवान् एतत् दक्षिणतः भ्रमयतु । तदा अपेक्षितं प्राप्यते । चक्रं वामतः भ्रमयतु । तेन वस्तूत्पत्तिः स्थगिता भवति । किन्तु सदा एतदेव न अवलम्बनीयं जीवनाय । परिश्रमजीवनं न त्यक्तव्यम् । उत्तमजीवनाय यावत् आवश्यकं तावत् यदा प्राप्यते तदा एतत् समुद्रे क्षेपणीयम् ।" सूजः तस्मै धन्यवादान् समर्प्य चक्रं गृहीत्वा गृहं प्रति प्रस्थितवान् ।

वेणुनिर्मितं चक्रम् अपेक्षितं दद्यात् इत्यत्र विश्वासः न आसीत् सूजस्य । अतः सः यमारस्य गृहं गत्वा अवदत् – "मित्र ! मम पुत्रस्य चिकित्सार्थं किञ्चित् धनम् आवश्यकम्" इति ।

"सूज ! किं करवाणि, मम समीपे एका वराटिका अपि नास्ति । भवतः साहाय्यं कर्तुं न शक्यते खलु इति नितरां विषीदामि अहम्" इति कृत्रिमविषादं प्रदर्शयन् अवदत् यमारः । "अचिरात् एव अहं प्रत्यर्पयिष्यामि मित्र !" इति अवदत् सूजः । "किं करवाणि ? यदि मत्समीपे धनं स्यात् तर्हि अवश्यं दद्याम्" इति । अवदत् यमारः । "भवतु । धने असति, भवान् कथं वा दद्यात् ?" इति वदन् ततः निर्गतवान् सूजः ।

पितुः हस्ते स्थितं वेणुचक्रं दृष्ट्वा अस्वस्थः पुत्रः अपृच्छत् – "तात ! कुतः आनीतम् एतत् ? किं वैशिष्ट्यम् एतस्य ?" इति "अपेक्षितम् आहारं दास्यति एतत् इति श्रूयते" इति चक्रं दक्षिणतः भ्रमयन् अनासक्त्या अवदत् सूजः ।

क्षणाभ्यन्तरे तत्र विविधाः आहारपदार्थाः प्रत्यक्षाः जाताः । सूजः वामतः चक्रं भ्रमितवान् । वस्तूत्पत्तिः स्थगिता । सूजस्य पत्नी पुत्रः च एतत् आश्चर्येण दृष्टवन्तौ । पुत्रस्य चिकित्सार्थम् औषधं प्रार्थितवान् सूजः । औषधं प्राप्तम् एव । तस्य सेवनात् पुत्रः स्वस्थः जातः । तावता वृष्टिः आरब्धा । गृहं स्रवति स्म । अतः सूजः चक्रं दक्षिणतः भ्रमयन् अवदत् – "उत्तमं गृहं प्राप्तं भवतु" इति । तादृशं गृहं क्षणाभ्यन्तरे प्राप्तम् एव ।

सूजस्य अपूर्वं गृहं दृष्ट्वा ग्रामस्थाः सर्वे आश्चर्येण स्तब्धाः । यमारः तु स्वस्य नेत्रयोः एव विश्वासं न प्राप्तवान् । सः सूजम् अपृच्छत् – "कथम् एतत् सम्पन्नम् ?" इति । "सर्वं भगवतः दयया" इति अवदत् सूजः ।

गच्छता कालेन सूजः उत्तमजीवनाय यद्यत् आवश्यकं तत्सर्वं प्राप्तवान् चक्रसाहाय्येन ।

एतत् दृष्टवतः यमारस्य चित्तशान्तिः विनष्टा, निद्रा चापि अपगता । एतस्याः ऐश्वर्यप्राप्तेः कारणं ज्ञातुं सः रात्रौ सूजस्य गृहे पौनःपुन्येन दृष्टिं प्रसारयति स्म ।

एकस्यां रात्रौ चक्रं दक्षिणतः भ्रमयन् पूजार्थं मूर्तिं प्रार्थयमानः सूजः दृष्टः यमारेण । मूर्तिप्राप्तेः अनन्तरं सूजः पत्नीम् अवदत् – "समुद्रे चक्रस्य क्षेपणाय कालः सन्निहितः अस्ति । परिश्रममयं जीवनं कदापि न विस्मरणीयम् अस्माभिः" इति ।

"भवतु" इति अवदत् सूजस्य पत्नी । ऐश्वर्यादिप्राप्तिः चक्रप्रभावतः एव भवति इति अवगतवान् यमारः ।

( अनुसन्धानम् ६ पृष्ठे ... )

## ग्रन्थपरिचयः ( दूतघटोत्कचम् )

व्योम शाहः

मनोहारिगद्यकारिणा बाणभट्टेन हर्षचरिते यः कवीन्द्रः 'यशस्वी' इति विशेषणेन संस्तुतः, तस्य महाकवेः भासस्य 'दूतघटोत्कचम्' इति नामधेयस्य नाट्यस्य उपक्रमेऽस्मिन् रसास्वदनं करिष्यामः।

• **कृतिप्रकारपरिचयः** – साहित्यदर्पणकृता विश्वनाथेन दशसु रूपकेषु 'अङ्कः' इत्याख्यः कश्चिद् भेदः पुरस्कृतः। 'उत्सृष्टिकाङ्कः' इति तस्यापरं नाम। अस्मिन् रूपकभेदे एकः एव अङ्कः भवति, प्राकृताः – नातिकोविदाः नायकाः भवन्ति, समाप्तिपर्यन्तं करुणः एव रसः स्थिरः भवति। अत्र बहूनि स्त्रीपात्राणि विलापश्च भाव्यः। पुराणेतिहासादिषु ख्यातः अख्यातः वा प्रसङ्गः इतिवृत्तरूपेण गृहीत्वा स्वबुद्ध्या उहापोहेन कविः प्रपञ्चं कर्तुं समर्थः। अत्र वाचां सङ्ग्रामः मुख्यत्वं भजति।

• **आधारसामग्री** – महाभारतस्य द्रोणपर्वान्तर्गतः अभिमन्युवधप्रसङ्गः एव अस्याः कृते बीजत्वं धरति। तस्मादेव कविना एतत् समस्तम् उत्प्रेक्षितम्।

• **पात्राणि** – धृतराष्ट्रः, दुर्योधनः, दुश्शासनः, भटः (जयत्रातः), शकुनिः, घटोत्कचः, गान्धारी, दुःशला, प्रतिहारी

• **कथासारः** – सर्वविघ्नोपशान्तये नान्दीश्लोके भगवतः श्रीविष्णोः स्तुतिः कृता। अङ्कस्य स्थापनायां सूत्रधारः अभिमन्योः मृत्युं विज्ञापयति।

नाट्यारम्भे भटः प्रासादं प्रविश्य अभिमन्योः हननस्य विषये उद्घोषयति। तदैव धृतराष्ट्रः गान्धारी दुःशला च प्रविशन्ति। भटस्य जयत्राताभिधस्य वचनं श्रुत्वा स्तब्धः धृतराष्ट्रः तत् अविश्वसन् 'श्रुतिपथदूषणम्' इति कथयति स्वकुलक्षयस्य विषये च चिन्तातुरः भवति। गान्धारी भर्तारं पृच्छति 'कथं नु कुलविग्रहः भविष्यति' इति। धृतराष्ट्रः प्रतिवदति यत् गाण्डिविनः अर्जुनस्य प्रभावात् समस्तः लोकः विनाशमवाप्य शान्तिं गमिष्यति इति। गान्धारी विलापं करोति। 'येन उत्तरायै वैधव्यं दत्तं, तस्य अपि युवती वैधव्यम् अवाप्स्यति।' इति। एतावद् दुःखम् असहमानो धृतराष्ट्रः पृच्छति यत् केन एषः व्यसनार्णवः कृतः। पुनश्च जयत्रातं पृच्छति यत् केन अभिमन्युः रणे निहतः। 'बहुभिः पार्थिवैः समागतैः निहतः अभिमन्युः। जयद्रथः अस्य निमित्तभूतः' इति प्रत्युदितं तेन भटेन। जयद्रथम् अस्य प्रपञ्चस्य निमित्तभूतं विज्ञाय धृतराष्ट्र-गान्धार्यौ शोचतः दुःशला च अश्रूणि पातयन्ती विलापं करोति। 'जनार्दनसहायस्य धनञ्जयस्य विप्रियं कृत्वा को हि नाम जीविष्यति?' इति विचिन्तयन्ती दुःशला स्वभर्तुः मृत्योः विषये अवबुद्धा एव।

धृतराष्ट्रः जयत्रातं धनञ्जयस्य दशायाः विषये पृच्छति। जयत्रातः कथयति यत् अर्जुनस्य अनुपस्थितिवशात् स इतोऽपि इदं वृत्तं न जानाति। अखिलं वृत्तं विज्ञाय धृतराष्ट्रगान्धार्यौ गङ्गातटं गन्तुम् उत्सुकौ भवतः। धृतराष्ट्रः स्वकीयेभ्यः पुत्रेभ्यः मृत्योः अनन्तरं जलप्रदाने स्वस्य असमर्थतां प्रदर्शयति।

तदा मिथः आलापयन्तः दुर्योधन-शकुनि-दुश्शासनाः प्रविशन्ति। दुर्योधनः कथयति यद् अद्य सङ्ग्रामे तेन विरोधे स्थिरता प्राप्ता। (उभयोः पक्षयोः समाना हानिः इति भावः। यथा क्रीडासु १-१ इति) दुश्शासनः अपि पराक्रमे अभिमन्यु-अर्जुनयोः तुल्यतां वर्णयन् अभिमन्युवधविषये वदति। शकुनिः अपि कथयति यद् अद्यतन-युद्धवशात् जयद्रथेन महत् यशः हृतम्। दुर्योधनः ततः दुश्शासन-शकुनी तातम् अभिवादयितुं प्रेरयति। मातुलः शकुनिः तम् अवरोद्धुं प्रयत्नं करोति। प्रयत्नः निष्फलः एव।

त्रयोऽपि गत्वा धृतराष्ट्रम् अभिवादयन्ति पृच्छन्ति च 'कथम् आशीर्वचनं न प्रयुक्तम्?' इति। इतः पितृ-पुत्रयोः वाग्युद्धं प्रारभते। धृतराष्ट्रः कथयति यत् पुत्रशताद् विशिष्टा तस्य सुता भ्रातृणाम् एव कारणतः वैधव्यं प्राप्स्यति। दुर्योधनः पृच्छति यत् कुतः अस्मिन् प्रसङ्गे जयद्रथः मरणम् आप्स्यति? इति। धृतराष्ट्रः उपालभते यत् बालम् अभिमन्युं निघ्नतां भवतां भुजाः कथं न पतिताः।

(क्रमशः...)

# मासवार्ता

**विदेशीयानां छात्राणां कृते आरब्धाः बालसंस्कृतवर्गाः**



संस्कृतं पठितुम् इच्छुकानां विदेशीयच्छात्राणां कृते एकलव्य-संस्कृत-एकेडेमीसंस्थानेन Online संस्कृतवर्गाः आरब्धाः सन्ति। आयोजनेऽस्मिन् बालकानां कृते 'Value Education through Sanskrit बालसंस्कृतवर्गाः' आरब्धाः वर्तन्ते। अस्मिन् उपक्रमे १ कक्ष्यातः ७ कक्ष्यायाः बालकाः आवर्षम् संस्कृतभाषायाः अध्ययनं करिष्यन्ति । अत्र उल्लेखनीयं यत् अस्मिन् ग्रीष्मावकाशे अमेरीकादेशस्थाः केनेडादेशस्थाः च छात्राः मासद्वयं प्रतिदिनं संस्कृतभाषायाः अध्ययनम् अकुर्वन्। श्रीमती सङ्गीता मिस्त्री, श्रीमती अमी गोहेल च छात्रेभ्यः मार्गदर्शनम् अयच्छताम्।

**सम्पन्नः स्तोत्रपाठवर्गः**

संस्कृतस्तोत्रं पठितुम् इच्छुकानां संस्कृतरसिकानां कृते एकलव्य-संस्कृत-एकेडेमीसंस्थानेन संस्कृतस्तोत्रपाठनाभ्यासक्रमाः सञ्चाल्यन्ते । उपक्रमेऽस्मिन् जुलाईमासस्य ५ दिनाङ्कात् आरभ्य अगस्तमासस्य ४ दिनाङ्कं यावत् शिवपूजनस्य, शिवमहिम्नः स्तोत्रस्य च अध्यापनम् अभवत्। श्रीऋषिपुरोहितः सुचारुतया छात्रान् अपाठयत्।

**सम्पन्नः Diploma in Sanskrit Teaching अभ्यासक्रमः**

एकलव्य-संस्कृत-एकेडेमीसंस्थानस्य २०२१-२२ तमवर्षस्य Diploma in Sanskrit Teaching इति अभ्यासक्रमः जुलाईमासस्य २७ दिनाङ्के सम्पन्नः संस्कृतमाध्यमेन संस्कृतं पाठयितुं समर्थानां शिक्षकाणां प्रशिक्षणाय अयम् अभ्यासक्रमः संस्थया सञ्चाल्यते । एतम् अभ्यासक्रमं प्रति विभिन्नेभ्यः क्षेत्रेभ्यः आगताः शिक्षकाः समाजे संस्कृतभाषां पाठयितुम् उत्सुकाः वर्तन्ते। अभ्यासक्रमोऽयं श्रीसोमनाथ-संस्कृतविश्वविद्यालयमान्यः वर्तते।

**सम्पन्नः सन्धिवर्गः**



संस्कृतव्याकरणं पठितुम् इच्छुकानां छात्राणां कृते एकलव्य-संस्कृत-एकेडेमीसंस्थानं प्रतिवर्षं सन्धिवर्गस्य आयोजनं करोति । एतस्मिन् उपक्रमे जुनमासस्य २७ दिनाङ्कात् आरभ्य जुलाईमासस्य २७ दिनाङ्कं यावत् एकस्य सन्धिवर्गस्य आयोजनम् अभवत्। अभ्यासक्रमेऽस्मिन् प्रमुखानां सन्धीनाम् अध्यापनं श्रीश्यामः पटेलः अकारयत्।

## कृपया हसन्तु

अधिकारी - (रमणम् उद्दिश्य) भो: रमण ! कार्यालये सर्वे कार्यं कुर्वन्त: सन्ति, त्वम् एकाकी एव अलस: इव एवमेव किमर्थम् उपविष्ट: असि ?

रमण: - महोदय ! कार्यालयं प्रति प्रविशन्तं भवन्तं सर्वे दृष्टवन्त: । मन्दभागी अहमेव न दृष्टवान् । अत: एवं जातम् ।

★ ★ ★ ★ ★

पति: - (पत्नीम् उद्दिश्य) न जाने किं जातम् ? अद्य निद्रा एव नागच्छति ।

पत्नी - यदि निद्रा नास्ति तर्हि पात्राणि प्रक्षालयतु ।

पति: - अहं तु एतत् सर्वं निद्रायाम् एव वदनस्मि ।

★ ★ ★ ★ ★

पत्नी - (पतिम् उद्दिश्य) मम भ्राता आगतवान् अस्ति । तं भोजनस्य विषये तु पृच्छतु भवान्...! !

पति - (श्यालम् उद्दिश्य) भो: श्यालमहोदय ! भवान् भोजनं कृत्वा आगतवान् अस्ति अथवा गृहं गत्वा करिष्यति ?

★ ★ ★ ★ ★

न्यायाधीश: - (चोरं प्रति) त्वं श्व: प्रात:काले चतुर्वादने मृत्युदण्डं प्राप्स्यसि ।

चोर: - न्यायाधीशस्य वचनं श्रुत्वा उच्चै: अहसत् ।

न्यायाधीश: - किमर्थं हससि ?

चोर: - मम तु जागरणम् एव सप्तवादने भवति ।

### समुद्रजलं किमर्थं लवणमयम् ?

सूजेन चक्रं कुत्र स्थाप्यते इत्यपि परिशीलितं तेन । अत: स: तत् चक्रं तस्यां रात्रौ चोरितवान् । अनन्तरदिने एव स: समीपस्थं द्वीपं प्रति नौकया प्रस्थितवान् । 'द्वीपे उत्तमं भवनं प्राप्य पत्नीपुत्रादिभि: सह वैभवोपेतं जीवनं करणीयम् इति चिन्तनम् आसीत् यमारस्य ।

प्रस्थानसमये आत्मना सह किञ्चित् आहारम् अपि नीतवान् आसीत् स: । घण्टां यावत् प्रयाणस्य अनन्तरं बुभुक्षा प्राप्ता तेन । अत: स: आहारसेवनम् आरब्धवान् । तदा तेन ज्ञातं यत् पाचक: पाके लवणयोजनम् एव विस्मृतवान् इति । स: चक्रं भ्रमयन् मनसि अवदत् – 'लवणम् आवश्यकम्' इति । तत: लवणोत्पत्ति: आरब्धा । नौका समग्रा लवणराशिना पूर्णा । किन्तु लवणोत्पत्तिस्थगनं कथम् इति यमार: न जानाति स्म । लवणभाराधिक्यात् नौका जले निमग्ना । नाविकौ कथमपि तरणं कृत्वा तीरं प्राप्तवन्तौ । तरणम् अजानन् यमार: समुद्रे निमग्न: सन् प्राणै: वियुक्त: जात: ।

चक्रं तु निरन्तरं लवणम् उत्पादयति स्म एव । अत: समुद्रस्य जलं लवणमयं जातम् । अद्यापि तत्र लवणस्य उत्पत्ति: निरन्तरं प्रवर्तते । वृष्टिजलसमावेशात् लवणांशता प्रतिवर्षं किञ्चित् न्यूना भवति ।

एतदेव समुद्रस्य लवणमयताया: कारणम् ।

## ज्ञानसरित्

श्यामः पटेलः

**श्रवणेन्द्रियस्य वैलक्षण्यम्** – सस्तनानां पशूनां शरीरेषु शब्दं ध्वनिं वा श्रोतुं शष्कुली भवति। सा शष्कुली बहिर्भागात् ध्वनितरङ्गान् सङ्गृह्य ज्ञानतन्तुभिः मस्तिष्कं प्रति प्रापयितुं सर्वथा उपयुक्ता अस्ति। सर्वे पशुपक्षिणः स्वशरीरक्षमतानुसारेण विभिन्नं ध्वनिं श्रवणेन्द्रियेण श्रोतुं समर्थाः सन्ति। मनुष्याः ''अल्ट्रासाउन्ड'' इत्येतत् सूक्ष्मध्वनिं च श्रोतुं न शक्नुवन्ति। किन्तु केचन पशवः स्वरक्षायै भोजनान्वेषणाय च सूक्ष्मध्वनिम् अपि श्रोतुं क्षमाः सन्ति। ''डोल्फिन'' मत्स्यः समुद्रतले सन् २४ किलोमीटरपरिमितात् दूरं जायमानं ध्वनिं सम्यग्रूपेण शृणोति। मार्जाराः कुक्कुराश्च ४,००,००० हर्ट्झ्–परिमितं सूक्ष्मध्वनिं शृण्वन्ति। मार्जारः तु किञ्चन शुष्कं पर्णम् अपि पवनेन दोलायमानं भवति चेत् स्वकर्णौ तां दिशं प्रति गमयति। मूषकस्य श्रवणेन्द्रियस्य अन्तः बृहद् विलं भवति। अतः बहिर्भागात् उत्थितः ध्वनिः शतगुणं वर्धित्वा श्रूयते। आफ्रिकामहाद्वीपस्य ''बेट-इयर्ड फोक्ष'' नामकः शृगालः स्वकीयौ कर्णौ भूमिं प्रति भ्रामयितुं शक्नोति। रात्रौ एव नयनेन्द्रियेण द्रष्टुं समर्थायाः जतुकायाः कृते तु ''अल्ट्रासाउण्ड'' इति सूक्ष्मध्वनिश्चापि श्रवणेन्द्रियग्राह्यो भवति। जतुका न केवलं ''अल्ट्रासाउण्ड'' इत्येतत् शृणोति। किन्तु सा ''अल्ट्रासाउण्ड'' इति जनयति अपि। यद्यपि समुद्रस्थानां मत्स्यानां कर्णेन्द्रियं न भवति तथापि तेषु केचन मत्स्याः ''अल्ट्रासाउण्ड'' इत्येतत् श्रोतुम् अर्हाः।



सस्तनप्राणिन् – mammal, शष्कुली – the orifice of the ear
विलम् – hollow, अर्ह – worthy of, fit

## शब्दमञ्जूषा

| | |
|---|---|
| **दीपः** | lamp |
| **तैलदीपः** | oil-lamp |
| **विद्युद्दीपः** | electric lamp |
| **दण्डदीपः** | tubelight |
| **पटलदीपः** | table lamp |
| **करदीपः** | hand lamp |
| **अग्रदीपः** | front lamp |
| **पृष्ठदीपः** | rear lamp |
| **स्फुरदीपः** | torchlight |
| **देवदीपः** | divine lamp |
| **देहदीपः** | body lamp (eye) |
| **मेघदीपः** | cloud light |
| **ज्ञानदीपः** | lamp of knowledge |
| **गोलदीपः** | bulb |

## किं भवन्तः जानन्ति ?

**१) धर्मस्य कति लक्षणानि उक्तानि सन्ति?**
(क) ७ ख) ८ (ग) ९ (घ) १०

**२) वेदानां कति अङ्गानि सन्ति?**
(क) ४ (ख) ५ (ग) ६ (घ) ७

**३) ईश्वरस्य कति अवताराः वर्तन्ते?**
(क) १० (ख) ११ (ग) १२ (घ) १३

**४) कति मरुद्गणाः वर्तन्ते?**
(क) ४८ (ख) ३९ (ग) ५० (घ) ५१

**५) रामायणे आहत्य कति काण्डाः सन्ति?**
(क) ४ (ख) ६ (ग) ७ (घ) ८

**६) महाभारते आहत्य कति पर्वाणि सन्ति?**
(क) १५ (ख) १६ (ग) १७ (घ) १८

**७) एकः कल्पः कति मन्वन्तराणां भवति?**
(क) १३ (ख) १४ (ग) १५ (घ) १६

उत्तराणि – (१) घ (२) ग (३) क (४) क (५) ग (६) घ (७) ख

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Learn Online**

## श्रीमद्भागवतपुराणम्

( दशम स्कन्ध का नियतांश )

**Date** : 23/08/2022 to 27/10/2022
**Day** : Tuesday - Thursday
**Time** : 06:30 pm to 8:00 pm
**Fees** : Rs. 5000/-

**Learn Online**

## स्तोत्रपाठः

( मातृपूजनम्, शक्रादयस्तुतिः च )

**Date** : 09/08/2022 to 08/09/2022
**Day** : Tuesday - Thursday
**Time** : 06:30 pm to 8:00 pm
**Fees** : Rs. 2500/-

**Contact: Dr Mihir Upadhyay - 98246 16237**

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

- શું તમે સંસ્કૃત બોલવા ઇચ્છો છો?
- શું તમે સંસ્કૃત ભાષાનાં ઉત્તમ શિક્ષક બનવા ઇચ્છો છો ?
- શું તમે સંસ્કૃતને સંસ્કૃત માધ્યમમાં ભણાવવા ઇચ્છો છો ?
- શું તમે સંસ્કૃતક્ષેત્રે ઉત્તમ કારકિર્દી બનાવવા ઇચ્છો છો ?

તો અહીં છે, એક તક એકલવ્ય સંસ્કૃત એકેડેમી દ્વારા આયોજિત

## "Diploma In Sanskrit Teaching"

**શ્રીસોમનાથ સંસ્કૃત યુનિવર્સિટી માન્ય કોર્ષમાં**
ભાગ લો અને ઉત્તમ શિક્ષક બનો.

- કોઈપણ પ્રવાહમાં ધોરણ ૧૨ પાસ, પ્રવેશને યોગ્ય.
- મર્યાદિત ૨૫ બેઠકો.
- પ્રવેશપત્ર કોરહાઉસ, ઓફ. સી જી રોડ ખાતે ઉપલબ્ધ.

### અભ્યાસક્રમની વિશેષતાઃ

→ તાલીમ માટેનું ગુણવત્તાયુકત વાતાવરણ.
→ પ્રત્યક્ષપદ્ધતિ દ્વારા શિક્ષણ.
→ અનુભવી શિક્ષકો દ્વારા શિક્ષણ.
→ શ્રેષ્ઠ તાલીમાર્થીઓ માટે નોકરીની ઉત્તમ તક.

વધુ માહિતી માટે સંપર્ક કરોઃ ડૉ. મિહિર ઉપાધ્યાય **9824616237**

संस्कृत-
## साम्प्रतम्

नमस्कारः
यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | – 100 |
| द्वैवार्षिकं रू | – 175 |
| त्रैवार्षिकं रू | – 250 |
| अङ्कमूल्यं रू | – 10 |

**प्रियवाचकाः**
- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006